श्रीः

श्री लक्ष्मी कीर्तनमालिका

श्रीरङ्गम्

को.ना. श्रीनिवासदासेन

विरचिता

२००९

लक्ष्मीकीर्तनशतमाला

by

Shri. K.N.Shrinivasan B.A., B.L.

(1) - अखिलदेव वन्दिताम्

रागः – किन्नरेशप्रिया तालः – तिश्र एकम्

पल्लवि

अखिलदेव–वन्दितां अयोनिजां भजाम्यहम् (अखिल)

अनुपल्लवि

निखिलचराचरात्मिकां नीरजासनां रमां (अखिल)

चरणम्

वसुधाधिप–पालिनीं वाञ्चित–फलदायिनीं
वसुदां वरवर्णिनीं वासुदेव–गेहिनीं (अखिल)

(2) - अखिलभुवन जननि माम्

रागः – चन्द्रकौंस तालः – तिश्र एकम्

पल्लवि

अखिलभुवन जननि मां आदाय वरवर्णिनि (अखिल)

अनुपल्लवि

निखिल–चराचरात्मिके नीरजदल–लोचने (अखिल)

चरणम्

वरुणालय–नन्दिनि वासववरदायिनि
अरुणांबुज–वासिनि अगणित–गुणशालिनि (अखिल)

(3) – अपारगुणमहिमां रमाम्

रागः – कापी तालः – आदि

पल्लवि

अपारगुणमहिमां रमां आश्रयामि कमलां हरिप्रियां (अपार)

अनुपल्लवि

कृपासागरोपमां परमां कुङ्कुमपुष्पाद्यर्चित–चरणां (अपार)

चरणम्

सरसिजासनादि देवविदितां सन्तप्तहेमवर्णविशिष्टां
वरदाभयकर–विलक्षितां तां विराजवाहनविराजितां मां (अपार)

(4) - अप्रमेयामहं वन्दे

रागः – सरस्वती तालः – मिश्र चापु

पल्लवि

अप्रमेयामहं वन्दे अनघाममृतोद्भवां (अप्रमेया)

अनुपल्लवि

विप्रवर्याश्रितां देवीं विष्णोरनपायिनीं (अप्रमेया)

चरणम्

पक्वबिम्बाधरोष्ठां तां पद्मिनीं पद्मगन्धिनीं
विश्वजननीं विशालाक्षीं विनतासुत–वाहिनीं (अप्रमेया)

(5) - अभयप्रदानशीलेऽम्ब

रागः – धर्मवती तालः आदि

पल्लवि

अभयप्रदान–शीलेऽम्ब अम्भोजनाभ–दयिते मामव (अभय)

अनुपल्लवि

उभयकावेरी–मध्यभवने उत्तरफल्गुनी–भोत्सव विभवे (अभय)

चरणम्

कविकथक–पञ्चानन–विनुते कनकमयासनोपस्थिते
दिविषदधिपादि–पूजिते द्विरदोद्धृत–घट–सुधास्नापिते (अभय)

(6) - अम्ब अम्बुजवननिलये

रागः – आनन्दभैरवी तालः – आदि

पल्लवि

अम्ब अम्बुजवन–निलये अयि मां धर्मनिलये (अम्ब)

अनुपल्लवि

रम्भा मेनकादि महिते रम्यजामातृ–दयिते (अम्ब)

चरणम्

कलये शिवेतरक्षतये कल्याणि कनकवलये
विलस मे हृदये सतत विनतात्मज–वाहने (अम्ब)

(7) - अम्बुधिसम्भवाम्

रागः –चारुकेशी तालः – रूपकम्

पल्लवि

अम्बुधि–सम्भवां आराधयामि सततं (अम्बुधि)

अनुपल्लवि

कम्बु–विजितकण्ठीं कामितवरप्रदां रमां (अम्बुधि)

चरणम्

करधृत–कञ्जसुमां काङ्क्षित–कल्पद्रुमां
सुरपति–नतमहिमां स्वर्णमयाभरणां (अम्बुधि)

(8) - अरविन्दनिवासिनीम्

रागः – जयमनोहरी तालः – तिश्र एकम्

पल्लवि

अरविंद–निवासिनीं अहर्निशं चिन्तयामि (अरविन्द)

अनुपल्लवि

मुरहर–सहचरिणीं मोहनतम–रूपिणीं (अरविन्द)

चरणम्

करधृत–वरकमलिनीं काञ्चनमय–देहिनीं
सरसिज–सुममालिनीं सरस–हृदय–तोषिणीं (अरविन्द)

(9) – अरविन्दनिवासिन्यै

रागः – भैरवी तालः – मिश्रचापु

पल्लवि

अरविन्दनिवासिन्यै आद्यन्तरहितायै नमः (अरविन्द)

अनुपल्लवि

शरदिन्दु–समाननायै जाम्भूनदप्रभायै (अरविन्द)

चरणम्

शतपत्र–लोचनायै शरणागतवत्सलायै
शतमखवरप्रदाय श्रीसख–संकीर्तितायै (अरविन्द)

(10) - अरविन्दपत्रनयनाम

रागः इन्दुमती तालः – तिश्र एकम्

पल्लवि

अरविन्दपत्रनयनां आराधयामि सततं त्वां (अरविन्द)

अनुपल्लवि

धरणीश्वरादि–महितां धन–धान्य–संपद्–प्रदां (अरविन्द)

चरणम्

शरणागतार्त–सुमुखीं सरसीरुहासन–सुखीं
शरदिन्दु–सुन्दरमुखीं सर्वेश्वर–प्रियसखीं (अरविन्द)

(11) - अरविन्दलोचनाम्

रागः – सालगभैरवी तालः – रूपकम्

पल्लवि

अरविन्दलोचनां आश्रयेऽहं अम्बिकां (अरविन्द)

अनुपल्लवि

सुरबृन्दवन्दितां सुवर्णरजतस्रजां (अरविन्द)

चरणम्

क्षीराब्धि–सम्भवां क्षौम–वस्त्रावृतां
नारायणत्मिकां नागारि–वाहनां (अरविन्द)

(12) - अरुणकमलसंस्थिता

रागः – चक्रवाकम् तालः – एकतालः, तिश्रगतिः

पल्लवि

अरुणकमल–संस्थिता अवतु मां सदा मुदा (अरुण)

अनुपल्लवि

निरुपम–कान्ति–संयुता नित्यसूरि–गणाश्रिता (अरुण)

चरणम्

अखिल–देवताश्रिता अच्युत–हृदय–स्थिता
निखिललोक–संस्तुता निरवधिक–सुखप्रदा (अरुण)

(13) - आर्तत्राणपरायणायै

रागः – नारायणगौळ तालः – आदि

पल्लवि

आर्तत्राण–परायणायै अरविन्द–लोचनायै नमः (आर्तत्राण)

अनुपल्लवि

कार्तस्वर–वर्णायै कामित–फलप्रद–निपुणायै (आर्तत्राण)

चरणम्

वरदाभय–करद्वयायै वन–जलसद्–द्विकराम्बुजायै
शरदिन्दुसमान–वदनायै सागर–सम्भवाम्बिकायै (आर्तत्राण)

(14) - इन्द्रादिदेववन्द्याम्

रागः – ललिता तालः – मिश्रचापु

पल्लवि

इन्द्रादिदेववन्द्यां इन्दिरामनिशं भजे (इन्द्रादि)

अनुपल्लवि

चन्द्रां हिरण्मयीं लक्ष्मीं चामीकर–कलेवरां (इन्द्रादि)

चरणम्

मुक्तामणि–विभूषितां मुरारि हृदयस्थितां
भक्ताभीष्ट–फलप्रदां भगवतीं भृगुमुनिसुतां (इन्द्रादि)

(15) - उदधिशायिनःप्रियां

रागः – कल्याण वसन्त तालः – तिश्र एकम्

पल्लवि

उदधिशायिनःप्रियां उपास्महे धर्मनिलयां (उदधि)

अनुपल्लवि

बुधजनाद्यादि–कृताश्रयां पुर्णेन्दु–मुखोदयां (उदधि)

चरणम्

वनजसुम–वनालयां वारिनिधीश्वर–कन्यां
सनकादिसूरि–वन्द्यां संरक्षित–जगत्रयां (उदधि)

(16) - कञ्जदलविलोचनीम्

रागः – शुद्धसावेरी तालः – तिश्र एकम्

पल्लवि

कञ्जदल–विलोचनीं कमल–वासिनीं भज रे (कञ्जदल)

अनुपल्लवि

पञ्जरशुक–बोधिनीं पीतवसन–धारिणीं (कञ्जदल)

चरणम्

कुञ्जर–वरगामिनीं कुवलयवन–विहारिणीं
वञ्जुल–नवमालिनीं वाहिनीधव–नन्दिनीं (कञ्जदल)

(17) - कञ्जनाभभामिनीम्

रागः – बौलि तालः – तिश्र एकम्

पल्लवि

कञ्जनाभ–भामिनीं कलये कमलां सदा (कञ्जदल)

अनुपल्लवि

कुञ्जरगण–सेवितां कुवलयादि–भूषितां (कञ्जदल)

चरणम्

कुम्भजमुनि–भावितां कुरबक–सुषमाङ्कितां
अम्बरीष–सन्नुतां अमरेश्वर–वन्दितां (कञ्जदल)

(18) - कनकमयकलेवराम्

रागः – कञ्चुकधारिणी तालः – तिश्र एकम्

पल्लवि

कनकमय–कलेवरां कलये कमलालयां (कनक)

अनुपल्लवि

घनकञ्चुकधारिणीं कनकमय–विभूषिणीं (कनक)

चरणम्

दारिद्रय–विनाशिनीं दामोदर–कामिनीं
सूरिजनाह्लादिनीं सुन्दरतम–वर्णिनीं (कनक)

(19) - कनकसन्निभकान्तिमतीम्

रागः – हेमवती तालः – आदि

पल्लवि

कनकसन्निभकान्तिमतीं कमलनिलया–मुपास्महे (कनक)

अनुपल्लवि

सनक–सनन्दनादि–सन्नुता सामजवर्षित–सुधास्नापितां (कनक)

चरणम्

मनसिजजनक–प्रियदयितां मणिमयमकुट–विराजितां
दिनकर–सन्निभ–दीप्तिमतीं दीनजनावन–दीक्षितां सुधां (कनक)

(20) – कमलनाभवल्लभाम्

रागः – नारायणी तालः – तिश्र एकम्

पल्लवि

कमलनाभ–वल्लभां कलये कमल–निलयां (कमलनाभ)

अनुपल्लवि

अमरपति–सुतात्मजां अङ्गजजननीं सुधां (कमलनाभ)

चरणम्

कनकमय–कलेवरां कमनीय–सुमाननां
कनक–रजत–भूषणां कञ्जदल–विलोचनां (कमलनाभ)

(21) - कमलवनसखीं रमाम्

रागः – दीपरेखा तालः – तिश्र एकम्

पल्लवि

कमलवन–सखीं रमां कलश–वार्धिजां भजे (कमल)

अनुपल्लवि

कमलनाभ–हृत्स्थितां कविवरादि–कीर्तितां (कमल)

चरणम्

वासव–सम्पत्प्रदां वसुधां वरवर्णिनीं
दास–श्रीसखस्तुतां दानव–सम्मानितां (कमल)

(22) – कमला तनोतु कुशलम्

रागः – छायागौल तालः – रूपकम्

पल्लवि

कमला तनोतु कुशलं कामप्रसदासता श्री (कमला)

अनुपल्लवि

अमराधिपाश्रितपदा अरुणाम्बुजासनस्था (कमला)

चरणम्

लावण्यमूर्तिस्सुधा लम्बालकोद्भासिता
भवने शास्तु सर्वदा भवतु प्रसन्न वरदा (कमला)

(23) - कलये कमलनिलयाम्

रागः – मुखारि तालः – तृपुट

पल्लवि

कलये कमलनिलयां कनकाभरण–भूषितां (कलये)

अनुपल्लवि

कलहंस–गामिनी कान्त्या जित–कौमुदीं (कलये)

चरणम्

कमलाक्ष–कुटुम्बिनीं करियूथ–विबोधिनीं
नमतां शुभदायिनीं नादामृत–रञ्जनीं (कलये)

(24) - कलये कमलनिलयाम्

रागः – कमासु तालः – तिश्र एकम्

पल्लवि

कलये कमल–निलयां करुणा–वरुणालयां (कलये)

अनुपल्लवि

फलवितरण–दक्षां पक्षपातानभिज्ञां (कलये)

चरणम्

जलजनाभ–दयितां जलनिधीश्वरसुतां
जलजसंभवाश्रितां जलजासन–संस्थितां (कलये)

(25) - कलशाम्बुधिकन्यकाम्

रागः – शुद्धधन्याशि तालः – मिश्रचापु

पल्लवि

कलशाम्बुधि–कन्यकां कलये कमलालयां (कलशाम्बु)

अनुपल्लवि

जलासन–सेवितां जगदीश–हृदि–स्थितां (कलशाम्बु)

चरणम्

शतपत्र–निभाननां शठकोप–मुनिस्तुतां

शतमख–राज्यप्रदां सकलागम–वर्णितां (कलशाम्बु)

(26) – काञ्चनमयकलेवराम्

रागः वरमु तालः – तिश्र एकम्

पल्लवि

काञ्चनमय–कलेवरां कमलां कलयाम्यहं (काञ्चन)

अनुपल्लवि

वाञ्छित–शुभफलप्रदां वैकुण्ठाधिप–प्रियां (काञ्चन)

चरणम्

वनजासन–सन्नुतां वारणगण–सेवितां

विनतासुत–वाहनां विकसित–कमलासनां (काञ्चन)

(27) - कुवलयदलनयने सततम्

रागः – रागेश्वरी तालः – आदि

पल्लवि

कुवलयदल्–नयने सततं कुरु कुशलं मम शोभने (कुवलय)

अनुपल्लवि

भुवनत्रय–परिपालिनि भुजगाधिप–शय भामिनि (कुवलय)

चरणम्

भवभीत्यादि निवारिणि भक्त–श्रीसख–पोषिणि

नवरत्न–खचित–भूषणि नाद–सुधारसा–मोदिनि (कुवलय)

(28) - क्षीरसमुद्रमध्यनिलये

रागः – धर्मवती तालः – आदि

पल्लवि

क्षीरसमुद्र–मध्यनिलये श्रीभार्गवि पाहि मां अम्ब (क्षीरसमुद्र)

अनुपल्लवि

नीरजनाभ–प्राणवल्लभे निखिललोक–जननि निरञ्जनि (क्षीरसमुद्र)

चरणम्

सारस–कान्तार–वासिनि साधु–जन–हृदय–विकासिनि
वारणनाद–प्रबोधिनि वाञ्छितफल–प्रदायिनि (क्षीरसमुद्र)

(29) - क्षेमं कुरु सन्ततम्

रागः – पुष्पलतिका तालः – मिश्र चापु

पल्लवि

क्षेमं कुरु सन्तत क्षीराम्बुधि–सम्भवे (क्षेमं कुरु)

अनुपल्लवि

सामजगण–सेविते सज्जनहृदय–स्थिते (क्षेमं कुरु)

चरणम्

पराशर–कीर्तिते भावुकजन–मानिते
ताराधिप–सोदरि दशमुखसहजेडिते (क्षेमं कुरु)

(30) - गानवरिनिधे कमले

रागः – गानवाहिनी तालः – तिश्र एकम्

पल्लवि

गानवारिनिधे कमले करुणयाव विमले (गान)

अनुपल्लवि

दीन–मानव वत्सले देवि इन्दु–शीतले (गान)

चरणम्

कमल–कानन–वासिनि कञ्ज–लोचन भामिनि
भ्रमर–चुम्बित कुन्तले भासमान मुखमण्डले (गान)

(31) - जगदीश्वर नयिकाम्

रागः – विजयनागरी तालः – तिश्र एकम्

पल्लवि

जगदीश्वरनायिकां जलजासनां भजामि (जगदीश्वर)

अनुपल्लवि

निगमगम वर्णितां निरवधि–करुणान्वितां (जगदीश्वर)

चरणम्

शतपत्र–निभाननां शर्वरीशसहानुजां
श्रित–भक्त–श्रीसखां श्रीरङ्गपुरालयां (जगदीश्वर)

(32) - जननि भव शरणम्

रागः – वरमु तालः – तिश्र एकम्

पल्लवि

जननि भव शरणं जलधिशयन–दयिते (जननि)

अनुपल्लवि

वनजासन–सन्नुते वात्सल्य महानिधे (जननि)

चरणम्

सुमसायक–जननि सुन्दरि वरवर्णिनि
कमलालय–वासिनि कनकमय–विभूषिणि (जननि)

(33) - जननीं जलनिधिसम्भवाम्

रागः –रिषभप्रिया तालः – आदि

पल्लवि

जननीं जलनिधि–सम्भवां जगदीश्वरीं भावयेऽहं (जननीं)

अनुपल्लवि

वनमालाधर–हृदिस्थितां वरदाभयकरां वसुप्रदां (जननीं)

चरणम्

शरदिन्दु–बिम्ब–समवदनां शातकुम्भमय दिव्याभरणां
पुरहरभावित नामदशशतां पुरन्धरेडित–पुण्यस्लोकां (जननीं)

(34) - जलजनाभसहचरीम्

रागः – हिन्दोल तालः – रूपकम्

पल्लवि

जलजनाभ–सहचरीं जननीं सदा भजेऽहं (जलज)

अनुपल्लवि

जलज–मन्दार–कुन्द जवन्ति–पाटल–मरुवक–
जाती–चम्पकादि–खचित मालाशोभित–देहां (जलज)

चरणम्

द्विरदाभिषिक्त–सुभगां दीनातिभञ्जनधियां
सुरभूप–राज्यप्रदां संगीत–सौरभमुदां (जलज)

(35) - जलजासनां भजेऽहं

रागः – मलहरी तालः – तिश्र एकम्

पल्लवि

जलजासनां भजेऽहं जननीमब्धिसम्भवां (जलजासनां)

अनुपल्लवि

तुलसी–भूषण प्रियां दुर्वासादि–पूजितां (जलजासनां)

चरणम्

नमामि चन्द्रवदनां न्रायण–समाश्रितां
समान–रहितां सुधां सन्तान–सौभाग्यदां (जलजासनां)

(36) – जलधिशयनवल्लभाम्

रागः – देवमनोहरी तालः – आदि (तिश्र गतिः)

पल्लवि

जलधिशयन–वल्लभां जननीं स्मर मानस (जलधि)

अनुपल्लवि

जलरुहवन–देवतां जगति महित–वैभवां (जलधि)

चरणम्

तिलसुमसम–नासिकां दिव्य–कुन्तलालकां
विलसिताब्जमालिकां वीणारव–सुरसिकां (जलधि)

(37) – जय जय जगदम्बिके

रागः – सुधामयी तालः – तिश्र एकम्

पल्लवि

जय जय जगदम्बिके जलधिसुते पालय मां (जय जय)

अनुपल्लवि

हयपूर्वे रथमध्ये हस्तिनादप्रबोधिये (जय जय)

चरणम्

सरसिज–कानन–निलये संरक्षित–जगत्रये
सुर–किन्नरादि–गेये संगीत–सुधामये (जय जय)

(38) – तप्तचामीकराभां माम्

रागः – हस्तिनादः तालः – त्रिपुट

पल्लवि

तप्तचामीकराभां मां तां भजाम्यहं जननीं (तप्तचामी)

अनुपल्लवि

सप्ततन्त्री–स्वप्नोपान्त स्वर–वर्ण–विनोदिनीं (तप्तचामी)

चरणम्

हस्तिनाद–प्रबोधिनीं हरिणीं वरवर्णिनीं
अस्थि–मालिडित–गुणिनीं अम्भोजनाभ–भामिनीं (तप्तचामी)

(39) - तारय मां त्रिभुवनपालिनि

रागः – मङ्गलकैशिकी तालः – आदि

पल्लवि

तारय मां त्रिभुवनपालिनि तापत्रय–विनाशिनि अम्ब (तारय)

अनुपल्लवि

क्षीराम्बुनिधि–नन्दिनि चिन्तयामि त्वां वरवर्णिनि (तारय)

चरणम्

हारकेयूरादि–भूषिणि हाटकमय–दिव्यदेहिनि
सारसाक्षहृदय–विलासिनि सामजार्पित सुधारञ्जनि (तारय)

(40) - त्रिलोकजननीं चिन्तयाम्यहम्

रागः – रविचन्द्रिका तालः – आदि

पल्लवि

त्रिलोकजननीं चिन्तयाम्यहं त्रिदिवसुन्दरी–सेवितां रमां (त्रिलोक)

अनुपल्लवि

पुलोमजापति–पूजितचरणां पुरारिभावित पुण्यश्लोकां (त्रिलोक)

चरणम्

सुरासुरार्चित पदाम्बुजां सुमशर–जननीं सुमध्यमां
करारविन्दां कमलनिलयां कान्तां कामितफलप्रदां (त्रिलोक)

(41) – देवदेवमनःप्रिये

रागः – अमृतवर्षिणी तालः – रूपकम्

पल्लवि

देव देव मनः प्रिये देहि मे मुदं सततं (देव देव)

अनुपल्लवि

देवराजादिपूजिते दैत्यराजाभिवन्दिते (देव देव)

चरणम्

सिन्धुराज–समुद्भवे सिन्दूर–वर्णमये
इन्दु–शीतले वसुदे इन्दिरे मे वसुन्धरे (देव देव)

(42) – देव देव मनोहरि

रागः – देवमनोहरी तालः – तिश्र एकम्

पल्लवि

देव देव मनोहरि दीनरक्षकि ईश्वरि (देव देव)

अनुपल्लवि

देवराज–पूजिते द्विरदबृन्द–सेविते (देव देव)

चरणम्

विहगराज–वाहने विजय–मङ्गलप्रदे
इह विरचय शुभमये इन्दिरे प्रभाविते (देव देव)

(43) – देवदेविकां वन्दे

रागः – कमासु तालः – तिश्र एकम्

पल्लवि

देवदक्विकां वन्दे दीनरक्षणोत्सुकां (देव देविकां)

अनुपल्लवि

देवराजादि पूजितां दैत्यराजाभिवन्दितां (देव देविकां)

चरणम्

कमलवन–विहारिणीं कनकमय शरीरिणीं
कमलनयन–भामिनीं कनकवसन–धारिणीं (देव देविकां)

(44) - देवि त्रैलोक्यपालिनि

रागः – तिलङ् तालः – आदि

पल्लवि

देवि त्रैलोक्यपालिनि देहि मे मुदं दीनजनावनि (देवि)

अनुपल्लवि

हे विश्वमङ्गल–दायिनि हेमरत्नमय–मालाधारिणि (देवि)

चरणम्

सामवेदादि–गान–विनोदिनि सामज–वर्षितसुधा–स्नापिनि
व्योमपुरीश्वर–वधूरूपिणि वन्दित–श्रीसखहृदय–विकासिनि (देवि)

(45) - नमामि वरवर्णिनीम्

रागः – वरवर्णिनी तालः – तिश्र एकम्

पल्लवि

नमामि वरवर्णिनीं नारायण–भामिनीं (नमामि)

अनुपल्लवि

सुमास्त्रकर जनकभामिनीं सुधाऽभिषेकमोदिनीं (नमामि)

चरणम्

कमलवन–विहारिणीं कलिकलुष–निवारिणीं
विमल–मनोविकासिनीं वैकुण्ठ–निवासिनीं (नमामि)

(46) – नागशयनसहचरीं नमामि

रागः – प्रसादिनी तालः – तिश्र एकम्

पल्लवि

नागशयन–सहचरीं नमामि भुवनेश्वरीं (नाग)

अनुपल्लवि

सागरवर–नन्दिनीं संरक्षित–मेदिनीं (नाग)

चरणम्

राग–ताल–मोदिनीं रम्यगीतरञ्जनीं

भागवत–हितैषिणीं भक्तवर–प्रसादिनीं (नाग)

(47) - निरवधिकरुणास्वरूपिणि

रागः – षण्मुखप्रिया तालः – आदि

पल्लवि

निरवधिकरुणा–रूपिणि नीरजलोचनि पालय मां (निरवधि)

अनुपल्लवि

निरतिशय–सुख–प्रदायिनि निस्सीम–वैभव–शालिनि (निरवधि)

चरणम्

नित्य–निर्विकार–स्वरूपिणि निस्समान–शोभन–कारिणि

नित्यमुक्त–जीवादि–पोषिणि नीरजनाभ–हृदय–वासिनि (निरवधि)

(48) - पङ्कजदलनयने अम्ब

रागः – कमलवासिनी तालः – रूपकम्

पल्लवि

पङ्कजदल–नयने अम्ब पाहि मां पञ्चविशिख–जननि (पङ्कज)

अनुपल्लवि

वेङ्कटनायक–रमणि विकसित–कमल–विलसिनि (पङ्कज)

चरणम्

परिचर–सुरयुवतिगणे पालित–चतुर्दश भुवने

विरिञ्चादिपूजितचरणे विमलहृदय–विकासकरणे (पङ्कज)

(49) – पङ्कजनाभकुटुम्बिनि

रागः – बेगड़ तालः – आदि

पल्लवि

पङ्कजनाभ–कुटुम्बुनि पालय मां वरवर्णिनि (पङ्कज)

अनुपल्लवि

सङ्कटभयापहारिणि सज्जनहृदय–विकासिनि (पङ्कज)

चरणम्

कुसुमशरायुध–जननि कुञ्जरनाद–विबोधिनि
वसुधाधिपगण–पोषिणि वारिजकानन–वासिनि (पङ्कज)

(50) – पङ्कजासनस्थिते

रागः – वरमु तालः – एक तालः (तिश्र गतिः)

पल्लवि

पङ्कजासनस्थिते पाहि मां सदा हिते (पङ्कज)

अनुपल्लवि

वेङ्कटेश्वर–दयिते वेधसाभिवन्दिते (पङ्कज)

चरणम्

धनदाद्युपाश्रिते दास–श्रीसख–स्तुते
कनकमय–विभूषिते कविजन–सम्मानिते (पङ्कज)

(51) - पङ्केरुहासनायाम्

रागः – बहुधारी तालः – तिश्र एकम्

पल्लवि

पङ्केरुहासनायां भक्तिं करोमि अचलां (पङ्केरु)

अनुपल्लवि

अङ्के हरेःस्थितायां अरविन्द–लोचनायां (पङ्केरु)

चरणम्

सुरनायक–स्तुतायां सौवर्ण–विग्रहायां
पुरवैरि–भावितायां पूर्णचन्द्राननायां (पङ्केरु)

(52) - पद्ममालाधरां देवीम्

रागः – सारङ्गः तालः – मिश्र चापु

पल्लवि

पद्ममालाधरां देवीं पद्मिनीं समुपाश्रये (पद्ममाला)

अनुपल्लवि

पद्मनाभ–प्रियां लक्ष्मीं प्रसादाभिमुखीं प्रभां (पद्ममाला)

चरणम्

सर्वलक्षण–सम्पन्नां सौन्दर्यदेवतां
सर्वाभीष्ट–फलप्रदां श्रद्धां श्रीसखस्तुतां (पद्ममाला)

(53) - परदेवतया पद्मालयया

रागः – नीळा तालः – आदि

पल्लवि

परदेवतया पद्मालयया पालितोऽस्म्यहं प्रभावृतया (परदेवतया)

अनुपल्लवि

परमपुरुषहृदि–विलसितया परात्परया पदसारसया (परदेवतया)

चरणम्

कनकमयाद्भुत–सुकलेवरया कञ्जनभावित–कनकांशुकया
सनकादियोगि–संश्रितपरया सन्नुत–श्रीसख–संप्रार्थितया (परदेवतया)

(54) - परिपालय माम्

रागः – कीरवाणी तालः – आदि

पल्लवि

परिपालय मां भृगुवर–नन्दिनि पञ्चबाणजननि पावनि (परिपालय)

अनुपल्लवि

करिणी–गमने काञ्चन–वर्णे करुणा–सदने कनकाभरणे (परिपालय)

चरणम्

हरिहृदयाब्ज–विलासिनि हरिहय–सम्पत्प्रदायिनि
करिशैलाग्र–निवासिनि करिवरनाद–विनोदिनि (परिपालय)

(55) - परिपालयाशु माम्

रागः – हाटकभूषणी तालः – रूपकम्

पल्लवि

परिपालयाऽऽशु मां कङ्केरुहासने (परिपालयाशु)

अनुपल्लवि

हरिहृदय–निवासिनि हाटकमय–भूषिणि (परिपालयाशु)

चरणम्

सरिताशय–नन्दिनि सामजवर–गामिनि
दुरितादि–निवारिणि त्रैलोक्य–पावनि (परिपालयाशु)

(56) - परिरक्षतु मां भार्गवनन्दिनी

रागः – भार्गवनन्दिनी तालः – आदि

पल्लवि

परिरक्षतु मां भार्गव–नन्दिनी परम–दयाकरी भक्तवशंकरी (परिरक्षतु)

अनुपल्लवि

हरिवक्षस्थल नित्य–वासिनी हेमराजमय दिव्य–मालिनी (परिरक्षतु)

चरणम्

करुणामृतरस–प्रवाहिनी कलिकल्मषभय–भञ्जनी
सुरुचिरमय–वाग्विजृम्भिणी सूरिजनेडित सुरवर–वर्णिनी (परिरक्षतु)

(57) - पाहि मां जगदीश्वर दयिते

रागः – नारायणि तालः – आदि

पल्लवि

पाहि मां जगदीश्वर–दयिते पङ्कजाप्तकुल–भूपाराधिते (पाहि मां)

अनुपल्लवि

रोहिणीश–सहजेति विश्रुते रुक्ममयभूषण–मण्डिते (पाहि मां)

चरणम्

वाहिनीधव–सुते सुललिते वारिजासनादि देवमहिते
एहि देवि इभबृन्द–सेविते इन्दिरे सकललोक–वन्दिते (पाहि मां)

(58) - पाहि मां पद्मनयने

रागः – परूजु तालः – तिश्र एकम्

पल्लवि

पाहि मां पद्मनयने पन्नगाशन–वाहने (पाहि मां)

अनुपल्लवि

त्राहि मां त्रिलोक–जननि त्रिदशाधिप–वरदायिनि (पाहि मां)

चरणम्

शङ्खचक्र–करे देवि शरदिन्दुसम–प्रभे
पङ्कजवन–वासिनि परमात्म–स्वरूपिणि (पाहि मां)

(59) – पाहि मां सदा पद्मवनालये

रागः – सरस्वती तालः – आदि

पल्लवि

पाहि मां सदा पद्मवनालये पञ्चबाण–जननि नमस्ते (पाहि मां)

अनुपल्लवि

रोहिणीरमण–सहोदरि रम्यजामातृ–हृदयेश्वरि (पाहि मां)

चरणम्

चन्द्रपुष्करिणी–पश्चिमे तटे चतुर्थप्राकार–कोण–स्थिते
इन्द्र–वागीश्वरादि भाविते इन्दिरे सिन्धुराज–तनये (पाहि मां)

(60) – पाहि मां परमेश्वरि

रागः – सरसाङ्गी तालः – तिश्र एकम्

पल्लवि

पाहि मां परमेश्वरि पद्मनाभ–दयिते अम्ब (पाहि मां)

अनुपल्लवि

देहि मे तव पादभक्तिं दीनरक्षण–दीक्षिते (पाहि मां)

चरणम्

वाहिनीधव–नन्दिनि वारिजास्त्रकर–जननि
रोहिणीवल्लभ–भगिनि रक्तसारस–विलासिनि (पाहि मां)

(61) - पुरुषोत्तमयुवति त्वाम्

रागः – सरसाङ्गी तालः – तिश्र एकम्

पल्लवि

पुरुषोत्तम–युवति त्वां पूजयामि सततं भुवनेश्वरि (पुरुषोत्तम)

अनुपल्लवि

पुरुहूतार्पित–हारे फुल्लकमल–लोचने (पुरुषोत्तम)

चरणम्

धन–धान्य–सन्तान– धैर्य–विद्या–जयप्रदे
कनकमयाभरणयुते कनकपीठ–विराजिते (पुरुषोत्तम)

(62) - प्रीणाति विश्वजननी

रागः – वीणारवः तालः – तिश्र एकम्

पल्लवि

प्रीणाति विश्वजननी पीताम्बर–धारिणी (प्रीणाति)

अनुपल्लवि

वीणारव–मोदिनी विद्वज्जन–मोहिनी (प्रीणाति)

चरणम्

गानसुधाह्लादिनी गीत–रसास्वादिनी
तानवर्ण–विनोदिनी तापत्रय–विनाशिनी (प्रीणाति)

(63) - भक्ताभीष्टप्रदायिनीम्

रागः – वरालिः तालः – आदि

पल्लवि

भक्ताभीष्ट–प्रदायिनीं भजामि भवभय–विनाशिनीं (भक्ताभीष्ट)

अनुपल्लवि

रक्ताम्भोज–निवासिनीं रङ्गपुराधिप–भामिनीं (भक्ताभीष्ट)

चरणम्

सर्वातिशय–स्वरूपिणीं सर्वोपद्रव–निवारिणीं
सर्वैश्वर्य–प्रदायिनीं सर्वाभरण–विभूषिणीं (भक्ताभीष्ट)

(64) - भक्ताभीष्टप्रदायिनीम्

रागः – घण्टामालव तालः – आदि

पल्लवि

भताभीष्टप्रदायिनीं भजामि सततं करीषिणीं (भक्ताभीष्ट)

अनुपल्लवि

व्यक्ताव्यक्त–स्वरूपिणीं विकसित–सारस–निवासिनीं (भक्ताभीष्ट)

चरणम्

करिवरनाद–प्रबोधिनीं कलिकल्मष–विध्वंसिनीं
करिशैलनाथ–कुटुम्बिनीं कविजनमानस–विकासिनीं (भक्ताभीष्ट)

(65) - भजत भार्गवनन्दिनीम्

रागः – सालग भैरवी तालः – तिश्र एकम्

पल्लवि

भजत भार्गव–नन्दिनीं भवरोग–निवारिणीं (भजत)

अनुपल्लवि

भुजगशायि–कुटुम्बिनीं भुवनमोहन–रूपिणीं (भजत)

चरणम्

रजत–रुक्म–विभूषिणीं रत्न–कञ्चुक–धारिणीं
सुजनमनो–विकासिनीं सुन्दरीं वरवर्णिनीं (भजत)

(66) - भज भज मानस कमलाम्

रागः – खरहरप्रिया तालः – रूपकम्

पल्लवि

भज भज मानस कमलां भृगुमुनिवर–कन्यकां (भज)

अनुपल्लवि

द्विजवरादि–पूजितां द्विरदयूथ–परिवृतां (भज)

चरणम्

निज–भक्तप्रियां रमां नीरज–नयनां शुभां
रजनीशानुजां परां रङ्गपुरालय–निलयां (भज)

(67) - भज मानस जननीम्

रागः – मोहनम् तालः – तिश्र एकम्

पल्लवि

भज मानस जननीं भार्गवनन्दिनीं हरिणीं (भज मानस)

अनुपल्लवि

निजभक्ताभिमानिनीं निर्मलहृदय–मोदिनीं (भज मानस)

चरणम्

अज–पुरन्दर–पालिनीं अरुण–कमल–निवासिनी
रजत–हाटक–मालिनीं रङ्गपुर–विहारिणीं (भज मानस)

(68) - भव मम शरणं भार्गवनन्दिनि

रागः – पूर्विकल्याणी तालः – आदि

पल्लवि

भव मम शरणं भार्गव–नन्दिनि भवतु सदा तव स्मरणं हरिणि (भव मम)

अनुपल्लवि

भुवनेश्वरि पुण्यफल–दायिनि भवभय–नाशिनि भक्त–विश्वासिनि (भव मम)

चरणम्

विरजानदीतीर–निवासिनि विद्वज्जनगण–मनोविकासिनि
धरणीश्वरादि–पद–प्रदायिनि दारिद्र्यादि दुःख–विनाशिनि (भव मम)

(69) - भार्गवनन्दिनि

रागः – अमृतवाहिनी तालः – तिश्र एकम्

पल्लवि

भार्गवनन्दिनि सौ भाग्य–विधायिनि मामव (भार्गव)

अनुपल्लवि

शार्ङ्गधर–प्रियभामिनि शातकुम्भमय–देहिनि (भार्गव)

चरणम्

करुणामृत–वाहिनि घन–कञ्चुक–धारिणी
अरुणाम्बुज–वासिनि अखिलागम–वेदिनि (भार्गव)

(70) - भावयेऽहं रङ्गधामगेहिनीम्

रागः –श्रीरागः तालः – रूपकम् (तिश्र एकम्)

पल्लवि

भावयेऽहं रङ्गधाम–गेहिनीं भक्तियुक्त–मानस–प्रसादिनीं (भावये)

अनुपल्लवि

देवदेव–हृत्प्रदेश–भास्वरीं दिव्य–हेम–रत्न–स्रग्विभूषिणीं (भावये)

चरणम्

कवेरजा–तटस्थ–मन्दिरालयां करेणुबृन्द–वन्दि–नाद–बोधिनीं
शिवेतरादिनिग्रह–स्वभाविनीं श्रीयतीन्द्रदर्शन–प्रवर्तिनीं (भावये)

(71) – मङ्गलदेवतां वन्दे

रागः – शुद्ध सावेरी तालः – तिश्र रूपकम्

पल्लवि

मङ्गलदेवतां वन्दे मातरं वसुधारिणीं (मङ्गल)

अनुपल्लवि

रङ्गपुरालय–वासिनीं रम्यजामातृ–कामिनीं (मङ्गल)

चरणम्

कनकनदीतट–वासिनीं कनकमयाद्भुत–भूषिणीं
कनक–कशिपुरिपु–मोहिनीं कनकमयांशुक–धारिणीं (मङ्गल)

(72) - मङ्गलदेवतामुपास्महे

रागः – मध्यमावती तालः – आदि

पल्लवि

मङ्गलदेवतामुपास्महे महाराज्यवरप्रदां (मङ्गल)

अनुपल्लवि

रङ्गभूपालां वल्लभां राका–चन्द्र–वदनां शुभां (मङ्गल)

चरणम्

कवेरजा–मध्यदेश–रसिकां काञ्चनाभ–तन्वीमयोनिजां
शिवेतरादि–निग्रहक्षमां श्रीसखादि–भक्त–कीर्तितां (मङ्गल)

(73) - मणिमयमकुटविराजिताम्

रागः – वकुलाभरणम् तालः – आदि

पल्लवि

मणिमयमकुट–विराजितां मङ्गलदेवतां भजेऽहं (मणिमय)

अनुपल्लवि

फणिपतिशायीहृदि–स्थितां प्रणत–जनावन–पण्डितां (मणिमय)

चरणम्

करधृत–कमलवराभयां कावेरीतट–पुरालयां
वरवीणारव–मनोलयां वन्दित–श्रीसख–वरप्रदां (मणिमय)

(74) - मणिसरोरुहे स्थिताम्

रागः –हेमन्त तालः – एकम् (तिश्र गतिः)

पल्लवि

मणिसरोरुहे स्थितां मङ्गलालयां भजेऽहं (मणिसरोरुहे)

अनुपल्लवि

मणीमण्डपे मनोज्ञे महति रत्नसिंहासने (मणिसरोरुहे)

चरणम्

त्रिदशसुन्दरी–सेवितां त्रिदिवराज–पूजितां
मदनमातरमिन्दिरां माधव–प्रियसखीं रमां (मणिसरोरुहे)

(75) – मतिं देहि मे मङ्गलनायिके

रागः – नायकि तालः – आदि

पल्लवि

मतिं देहि मे मङ्गलनायिके मारजननि महालक्ष्मि (मतिं देहि)

अनुपल्लवि

गतिं न जने त्वां विनाऽहं गजवर्षित सुधास्नान–रसिके (मतिं देहि)

चरणम्

महाविष्णु–वक्षस्थल स्थिते महाराज्यादि–वरप्रदे
महादेव–प्रभावित–कीर्ते महामन्त्रोपासिते मूर्ते (मतिं देहि)

(76) - मनसा स्मरामि मङ्गलनिलयाम्

रागः – वसन्त तालः – आदि

पल्लवि

मनसा स्मरामि मङ्गलनिलयां मन्दरधर मधुसूदन–प्रियां (मनसा)

अनुपल्लवि

विनतानन्दन–वाहनां रमां विकसित–सारसनिभ–वदनां (मनसा)

चरणम्

कनकमयाभरणां कान्तां कनक–दुकूलां सितोत्तरीयां
वनजपदां वरदाभय–हस्तां वकुलाभरण–सूरि–संश्रितां (मनसा)

(77) - मनसा स्मरामि मातरम्

रागः – सरसाङ्गी तालः – आदि

पल्लवि

मनसा स्मरामि मातरं महालक्ष्मीमन्वहं तां (मनसा)

अनुपल्लवि

विनतानन्दन–वाहनां विष्णुमानस–गेहिनीं (मनसा)

चरणम्

कनकरुचिर–वरवर्णिनीं करिणीसमान–गामिनीं
कनकवसनादि–धारिणीं कवितावनादि–मोहिनीं (मनसा)

(78) - मरकतमणिवलये

रागः – सारङ्ग तालः – आदि

पल्लवि

मरकतमणिवलये मामव मधुसूदन–जाये भार्गवि (मरकत)

अनुपल्लवि

अरविन्द–वनालये अजये अज–पुरन्दरादिनुते विजये (मरकत)

चरणम्

स्थिरतर–सम्पत्प्रदे वसुदे सिद्ध–चारणादि–संसेविते
चिरमिह विलस मम गृहे श्रीसखनुत वरदे परदेवते (मरकत)

(79) - मातर्नमामि कमले

रागः – मलहरि तालः तिश्र एकम्

पल्लवि

मातर्नमामि कमले मां पालयाशु विमले (मातः)

अनुपल्लवि

कार्तस्वराभ–वसने कमलाटवी–निवसने (मातः)

चरणम्

गजराज–संसेविते गणनाथ–संभाविते
अज–वासवादि–विनुते अम्बोजनाभ–दयिते (मातः)

(80) - मातः श्री महालक्ष्मि

रागः – शुद्धबङ्गाल तालः – तिश्र एकम्

पल्लवि

मातः श्री महालक्ष्मि महाविष्णु–कुटुम्बिनि (मातः)

अनुपल्लवि

श्वेतद्वीप–वासिनि श्रितजन–संरक्षिणि (मातः)

चरणम्

वीणारव–मोदिनि विरजातट–वासिनि
गानामृत–रञ्जनि गायकजन–पालिनि (मातः)

(81) - मानातीत–प्रथितविभवाम्

रागः – यदुकुलकाम्भोजी तालः – मिश्र चापु

पल्लवि

मानातीत–प्रथित–विभवां मङ्गलालयां व्रजेह शरणं (मानातीत)

अनुपल्लवि

दीनार्ति–भञ्जन–निपुणां देवेन्द्रपूजित–चरणां (मानातीत)

चरणम्

वीणारव–मुदितहृदयां विचित्र–प्रबन्ध–रसिकां
गानामृत–प्रवाह–निलयां गाथासहस्र–विदितवैभवां (मानातीत)

(82) - मामव मङ्गलालये

रागः – हिन्दोल तालः – तिश्र एकम्

पल्लवि

मामव मङ्गलालये मधुसूदन–हृदिस्थिते (मामव)

अनुपल्लवि

सामजवृन्द–सेविते सज्जनपालन–निरते (मामव)

चरणम्

हेमघटसुधा–स्नापिते हैमाभरण–मण्डिते
तामरसासन–स्थिते तारय मां श्री–वसुदे (मामव)

(83) – मुदमावह मे भगवति

रागः – साम तालः – आदि

पल्लवि

मुदमावह मे भगवति मुरवैरिणस्सहचरी (मुदमावह)

अनुपल्लवि

बुधजनेडिते भार्गवि भुवनत्रय–विकासिनि (मुदमावह)

चरणम्

करधृताब्ज–भूषणि करुणामृत–वाहिनि
परमाद्भुत–रूपिणि परमात्म–स्वरूपिणि (मुदमावह)

(84) – रक्ताम्बुजनिवासिनीम्

रागः –सुरटी तालः – तिश्र एकम्

पल्लवि

रक्ताम्बुज–निवासिनीं रमां भजत स्वामिनीं (रक्ताम्बुज)

अनुपल्लवि

भक्ताभीष्ट–प्रदायिनीं परमात्म–स्वरूपिणीं (रक्ताम्बुज)

चरणम्

करधृत–कमलद्वयां करुणा–वरुणालयां
मुररिपु–हृदयालयां मकरालय–वरकन्यां (रक्ताम्बुज)

(85) - रक्षितोऽहं महादेव्या

रागः – ललिता तालः – मिश्र चापु

पल्लवि

रक्षितोऽहं महादेव्या रङ्गेश्वर्या रमया (रक्षितोऽहं)

अनुपल्लवि

पक्षिवाहनया परया पङ्केरुह–निवसनया (रक्षितोऽहं)

चरणम्

धर्म–वर्मादि संनुतया धर्मनिलयया देव्या
निर्मल–हृदय–विकासिन्या नित्यपुष्टया जयया (रक्षितोऽहं)

(86) – रक्षितोऽहं महादेव्या

रागः – नटभैरवी तालः – मिश्रचापु

पल्लवि

रक्षितोऽहं महादेव्या राजीव–वनालयया (रक्षिताऽहं)

अनुपल्लवि

पक्षिवाहन–वल्लभया फाललोचन–भावितया (रक्षितोऽहं)

चरणम्

सिन्धुराज–वरात्मजया सितवर्णोत्तरीयया
सिन्दूरवर्ण–विग्रहया सुधाकरानुजया अजया (रक्षितोऽहं)

(87) - रक्षितोऽहं महालक्ष्म्या

रागः – सौराष्ट्रम् तालः – आदि

पल्लवि

रक्षितोऽहं महालक्ष्म्या राजीव–वनालयया (रक्षितोऽहं)

अनुपल्लवि

पक्षिराज–वाहनया भक्तवन्दितया परया (रक्षितोऽहं)

चरणम्

सिन्धुराज–कन्यकया सितवर्णोत्तरीयया
सिन्दूर–वर्णाम्बरया श्रीसखादि–सेवितया (रक्षितोऽहं)

(88) – रङ्गपुरीनिवासिनीम्

रागः हंसानन्दी तालः – तिश्र एकम्

पल्लवि

रङ्गपुरीनिवासिनीं रमां स्मरामि जननीं (रङ्गपुरी)

अनुपल्लवि

मङ्गलप्रदायिनीं मदनुग्रहकारिनीं (रङ्गपुरी)

चरणम्

रङ्गनाथभामिनीं रत्नमयविभूषिणी
अङ्गज–जन्मदायिनीं अतिसुन्दररूपिणीं (रङ्गपुरी)

(89) – राकेन्दुबिम्बवदनामु

रागः – नटभैरवी तालः – मिश्र चापु

पल्लवि

राकेन्दुबिम्ब–वदनां रम्यां रमां भजामि (राकेन्दु)

अनुपल्लवि

साकेतराज–विनुतां संवीत–स्वर्णाम्बरां (राकेन्दु)

चरणम्

अतसीसुम–नासिकां अन्यपुष्टादि–बिधितां
शतपत्र–वनालयां सकललोकेश–दयितां (रकेन्दु)

(90) – राजीवनेत्रयुगले मामव

रागः – बिलहरि तालः – आदि

पल्लवि

राजीवनेत्र–युगले मामव रङ्गेश्वर–हृदिस्थितेऽम्ब (राजीवनेत्र)

अनुपल्लवि

वाजीभरथ–सेविते वासव–प्रमुखादि वन्दिते (राजीवनेत्र)

चरणम्

देवि त्वदीय कटाक्षलेशात् धनदाधिपाः भवन्ति दीनाः
कावेरीतीर–विहारिणि कविबुधजन विश्वासिनि (राजीवनेत्र)

(91) - वन्देऽरविन्दस्थिताम्

रागः – खरहरप्रिया तालः – तिश्र एकम् (तिश्र गतिः)

पल्लवि

वन्देऽरविन्दस्स्थितां चन्द्रां जगन्मातरं (वन्दे)

अनुपल्लवि

वन्दे मुकुन्दप्रियां वारां निधि–सम्भवां (वन्दे)

चरणम्

हेरम्ब–संसेवितां हेमारविन्द–स्रजां
श्रीरङ्ग–चन्द्रात्मिकां श्रीनिवास–दास–स्तुतां (वन्दे)

(92) – वन्दे वरदे वारिनिधिसुते

रागः – चारुकेशी तालः – आदि

पल्लवि

वन्दे वरदे वारिनिधिसुते वनजासनादि देव–वन्दिते (वन्दे)

अनुपल्लवि

त्वं देव–देव–महिषि मामव धनधान्य–संपत्प्रदे वसुदे (वन्दे)

चरणम्

सकललोक–महिते परमेश्वरि सकृत्प्रणत–वत्सले रमेश्वरि
सकलकलुष–हारिणि महेश्वरि सरसिजवन–निलये ईश्वरि (वन्दे)

(93) – वनजासनां भजेऽहम्

रागः – बेगड तालः – मिश्र त्रिपुट

पल्लवि

वनजासनां भजेऽहं वरदाभय–हस्तां (वनजा)

अनुपल्लवि

सनकादि–सूरि महितां सरसीरुहाक्षसहितां (वनजा)

चरणम्

दिननाथ–मण्डलस्थां दीनार्तिहरण–निपुणां
मनसा स्मरामि वसुदां मातरं सकल–जगतां (वनजा)

(94) – वरदाभय कराम्बुजां कमलाम्

रागः – हरिकाम्भोजी तालः – आदि

पल्लवि

वरदाभय–कराम्बुजां कमलां वनजालयां भावयेऽहं (वरदाभय)

अनुपल्लवि

वमातङ्गगणैर्वृतां वनजाक्षहृदय–विलासितां (वरदाभय)

चरणम्

नारदमुनि–प्रवृत्ततन्त्रां नाना–मन्त्रोपासन–मुदितां
शारदचन्द्र–निन्दकवदनां शीतकिरण–सरसीतट–निलयां (वरदाभय)

(95) – वारणगणसेविताम्

रागः – मोहनम् तालः – तिश्र एकम्

पल्लवि

वारणगण–सेवितां वन्दे परदेवतां (वारण)

अनुपल्लवि

नारद–पर्वत–स्तुतां नारायण–कराश्रितां (वारण)

चरणम्

निरवधिक–गुणालयां निरुपाधिक–दयालयां
करधृत–वरकुवलयां कमलनाथ–हृदयालयां (वारण)

(96) – वारिजदलनयनां भजेऽहम्

रागः – सुप्रदीप तालः – आदि

पल्लवि

वारिजदल–नयनां भजेऽहं वनज–वनालय–निलयां देवीं (वारिज)

अनुपल्लवि

दारिद्र्यहरण–धर्मनिरतां धनदाधिप–संपत्प्रदां (वारिज)

चरणम्

भूरिमनोज्ञ–रूपातिशयां भूषाञ्चितकर–विधृत–कुवलयां
सूरिजनेडित–रङ्ग–पुरालयां सुवर्ण–रूषित–शोभन–वलयां (वारिज)

(97) – वासवाद्यमरवन्दिते

रागः – पन्थुवरालि तालः – आदि

पल्लवि

वासवाद्यमर–वन्दिते वासुदेव–महिषि नमोऽस्तुते (वासवा)

अनुपल्लवि

वासनात्रय–विवर्जिते वारिजासनादि–भाविते (वासवा)

चरणम्

भासमान–नवरत्नभूषिते भाव–राग–ताल–मोदिते
दास–श्रीसखादि–पूजिते द्विरदवर्षित–सुधास्नापिते (वासवा)

(98) – वाहिनीशतनये पाहि माम्

रागः – हमीरु कल्याणी तालः – आदि

पल्लवि

वाहिनीश–तनये पाहि मां वैकुण्ठनाथ–प्रिये सदये (वाहिनीश)

अनुपल्लवि

रोहिणीश–सन्निभ–वदने रुक्मवर्ण–वसन–विलसिते (वाहिनीश)

चरणम्

देवभाग–भागर्षि–प्रवृत्तमन्त्रे दीनमान–संरक्षणनिपुणे
देवराज्यादि–पूजित–चरणे दिव्य–हेम–मकुटाद्याभरणे (वाहिनीश)

(99) – विहर मे हृदये सदा

रागः – नागस्वरावली तालः – तिश्र एकम्

पल्लवि

विहर मे हृदये सदा विजयलक्ष्मि नमोऽस्तु ते (विहर)

अनुपल्लवि

विहगवाहन–मोहिनि विरजातीर–वासिनि (विहर)

चरणम्

कमलाटवी–निवसने कनकमयाद्भुत–वसने
कमलसदृश–सुनयने कनक–रजतमयाभरणे (विहर)

(100) – शङ्खचक्रधरां देवीम्

रागः – वलजी तालः – तिश्र एकम्

पल्लवि

शङ्खचक्रधरां देवीं सततं मां स्मराम्यहं (शङ्खचक्र)

अनुपल्लवि

शङ्कर–रामानुजादि सकलगुरुवरेडितां (शङ्खचक्र)

चरणम्

मङ्गलप्रद–देवतां मधुसूदन–वल्लभां
रङ्गपुर–विराजितां राक्षसनृप–पूजितां (शङ्खचक्र)

(101) – शतपत्रसमानने

रागः – हिन्दोल तालः – तिश्र एकम्

पल्लवि

शतपत्र–समानने सदा विहर मे सदने (शतपत्र)

अनुपल्लवि

शतमख–सत्कृत–चरणे शातकुम्भमयाभरणे (शतपत्र)

चरणम्

कञ्जदल–विलोचने काञ्चनमय–सुवसने
कुञ्जरतरुणी–गमने कुवलय–सिह्मासने (शतपत्र)

(102) – शतपत्रसुमाराधिते

रागः – कीरवाणी तालः – आदि

पल्लवि

शतपत्रकुसुमाराधिते शातकुम्भवर्णे सुरदने (शतपत्र)

अनुपल्लवि

शतमखादि सुरार्चिते शार्ङ्गधन्वाप्रिय–दयिते (शतपत्र)

चरणम्

दुर्वास–मुनीन्द्रसन्नुते दुन्दुभिवाद्य–नादमुदिते
दुर्वासनादि–दुःखापहे दुग्धाम्बुधि–सुते लालिते (शतपत्र)

(103) – शर्वरीशवदनां भज

रागः – सामा तालः – रूपकम्

पल्लवि

शर्वरीश–वदनां भज शातकुम्भवर्णां (शर्वरीश)

अनुपल्लवि

सर्वभूतहिते रतां सर्वाश्रय हृदि–स्थितां (शर्वरीश)

चरणम्

पद्मालय–निवासिनीं परमात्म–स्वरूपिणीं
पद्मासनादि–जननीं भक्ताभीष्ट–दायिनीं (शर्वरीश)

(104) – शरदिन्दुनिभानने

रागः – सरसीरुह तालः – रूपकम्

पल्लवि

शरदिन्दु–निभानने शरणं भव शोभने (शरदिन्दु)

अनुपल्लवि

सरसिज सिह्मासने सरसीरुह–लोचने (शरदिन्दु)

चरणम्

मुरहर–हृदयासने मुदमावह–सुरदने
सुरपतिनत–पावने सुलभाश्रयाब्जचरणे (शरदिन्दु)

(105) – शशिवदने सततं मम सदने

रागः – पूषावलि तालः – आदि

पल्लवि

शशिवदने सततं मम सदने सन्निधिं कुरु सरोजनयने (शशि)

अनुपल्लवि

शशिशेखर–कीर्तित सुगुणे शरणागतजन–त्राणनिपुणे (शशि)

चरणम्

कनकमयाद्भुत–दिव्याभरणे कमलजादिनुत–मङ्गलचरणे
विनतानन्दन–दिव्यवाहने वैकुण्ठाधिप–मनोनिवसने (शशि)

(106) – शीतकिरणसहजाम्

रागः – ललिता तालः – रूपकम्

पल्लवि

शीतकिरण–सहजां चिन्तयामि सततं मां (शीतकिरण)

अनुपल्लवि

पीतवसन–रमणीं प्रीति–पुष्करिणीं धनिनीं (शीतकिरण)

चरणम्

सुरभूसुर–सेवितां सुवर्णमय–भूषितां
सुरपति–विभवप्रदां सुकवित्व–वरप्रदां (शीतकिरण)

(107) - श्रीजगदम्बिके पाहि माम्

रागः – धर्मवती तालः – आदि

पल्लवि

श्रीजगदम्बिके पाहि मां श्रितजन–कल्पलतिके अम्ब (श्रीजगदम्बिके)

अनुपल्लवि

वैजयन्तीधर नायिके वाञ्चितफल–प्रदायिके (श्रीजगदम्बिके)

चरणम्

करधृत–सरसीरुहद्वये कविजन–संमोदित–हृदये
वरदाभयकर–विलक्षिते वागाधिपादि वन्दिते (श्रीजगदम्बिके)

(108) - श्रीरङ्गनायिका अवतु

रागमालिका तालः – आदि

श्री रागः

१. श्रीरङ्गनायिका अवतु श्रित–सकल–चराचरा अम्बिका (श्रीरङ्गनायिका)

रागः – देव्मनोहरी

२. श्रीरङ्ग–भूदेव–मनोहरी शुभफलप्रदा करुणामृत–लहरी (श्रीरङ्गनायिका)

रागः – धन्याशि

३ धन्या शीतकिरणनिभ–वदना धनधान्य–कारिणी करीषिणी (श्रीरङ्गनायिका)

रागः – नादविनोदिनी

४. अन्य–पुष्टादि–पक्षिगणनाद– विनोदिनी वरदान–पायिनी (श्रीरङ्गनायिका)

रागः – मतङ्गगामिनी

५. मणिमय–हाटक–भूषिणी मारजननी मतङ्ग–गामिनी (श्रीरङ्गनायिका)

रागः – मङ्गलदायिनी

६. घृणि–शतकोटि–प्रभावृता गौरीशनुता मङ्गल–दायिनी (श्रीरङ्गनायिका)

(109) - श्रीरङ्गराजमहिषीम्

रागः – हरिकाम्भोजी तालः – तिश्र एकम्

पल्लवि

श्रीरङ्गराज–महिषीं श्रियमाश्रयामि सततं (श्रीरङ्ग)

अनुपल्लवि

हेरम्बनाद–मुदितां हेमाभरण–भूषितां (श्रीरङ्ग)

चरणम्

कावेरीतट–निलयां कविकथक–सिह्मविनुतां
देवराजार्चित–पदां दीनरक्षण–दीक्षितां (श्रीरङ्ग)

(110) - श्वेतकूटनिवसने

रागः – श्रीरागः तालः – तिश्र एकम्

पल्लवि

श्वेतकूट–निवसने शीतांशु–समानने (श्वेतकूट)

अनुपल्लवि

शातकुम्भाभ–वर्णे शतपत्र–वरासने (श्वेतकूट)

चरणम्

पुण्डरीकाक्ष–दयिते पुरुहूतादि–वन्दिते
कुण्डल–हार–मण्डिते गुरुजन–सम्मानिते

मध्यकाल साहित्यम्

चण्डरवि–प्रभावृते सकलागम–कीर्तिते
अण्डजवाहन–स्थिते अखिललोक–नमस्कृते (श्वेतकूट)

(111) – सकलजगदधीश्वरीम्

रागः – कन्नड तालः – तिश्र एकम्

पल्लवि

सकलजगदधीश्वरीं सरसिजनिलयां भजे (सकल)

अनुपल्लवि

मकरध्वज–मातरं मङ्गलालयामनघां (सकल)

चरणम्

कनकमय–विभूषणां कञ्जदल–विलोचनां
विनतात्मज–वाहनां विकसित–कमलाननां (सकल)

(112) – सत्यलोकादवतीर्णां माम्

रागः – हेमवती तालः – आदि

पल्लवि

सत्यलोकादवतीर्णां मां सरसिजासनां भजामि (सत्य)

अनुपल्लवि

नित्यमज्ञात–निग्रहां रमां नीरजासनादि–विनुतां मां (सत्य)

चरणम्

कनकवाहिनीतट–विराजितां कमलनाभहृदय–सुस्थितां
कनकमयाभरण–मण्डितां कविकथक–सिंहनाद–मुदितां (सत्य)

(113) – सततं स्मरामि

रागः – हंसनादः तालः – मिश्र चापु

पल्लवि

सततं स्मरामि भवतीं सागरनन्दिनीं हरिणीं (सततं)

अनुपल्लवि

नतभक्त–वत्सलां नारदादि–मुनिस्तुतां (सततं)

चरणम्

सामजकरोत्क्षिप्त घटवर्षसुधामोदां सारसनिलयां साधुजनाश्रितां
वामदृशां वनजासनस्तुतां वारिजलोचनां वसुदां वरदां शुभां (सततं)

(114) -सदाऽऽश्रयामि जननीम्

रागः – भूपालम् तालः – तिश्र एकम्

पल्लवि

सदाऽऽश्रयामि जननीं सकलागम–वेदिनीं (सदा)

अनुपल्लवि

गदाधर–कुटुम्बिनीं गजनाद–प्रबोधिनीं (सदा)

चरणम्

मकरध्वज–जननीं मङ्गल–वर–रूपिणीं
मकरालय–नन्दिनीं महापापप्रशमनीं (सदा)

(115) – सर्वलोकप्रियङ्कर्यै

रागः – प्रियङ्करी तालः – मिश्र चापु

पल्लवि

सर्वलोक–प्रियङ्कर्यै सर्वेश्वर्यै नमोऽस्तु ते (सर्वलोक)

अनुपल्लवि

सर्वमङ्गल–दायिन्यै सर्वभूत–हित–प्रदायै (सर्वलोक)

चरणम्

सर्वमन्त्रात्मिकायै सर्वाभरण–भूषितायै
सर्वरोग–हारिण्यै सर्वशक्तिमय्यै रमायै (सर्वलोक)

(116) – सर्वोपद्रव निवारिणीम्

रागः – सुरटी तालः – आदि

पल्लवि

सर्वोपद्रव–निवारिणीं सदा स्मरामि वरवर्णिनीं (सर्वोपद्रव्)

अनुपल्लवि

सर्वोत्तमहृदय–वासिनीं साधुजनेडित–पद्मगन्धिनीं (सर्वोपद्रव)

चरणम्

सकलसौभाग्य–दायिनीं संसारदुःख–प्रणाशिनीं
सकल–विश्वाधिव्यापिनीं सवितृमण्डल–विलासिनीं (सर्वोपद्रव)

(117) – सरसिजवननिलया

रागः – रागेश्री तालः – तिश्र एकम्

पल्लवि

सरसिजवन–निलया संरक्षतु मां दयया (सरसिज)

अनुपल्लवि

स्फुरतु मे हृदि विजया सुधासागर–तनया (सरसिज)

चरणम्

सुधामयी धर्म–निलया सुवर्णमणि–वलया
सुधांशु–सहजा अजा या सुरसुन्दर्यति–लावण्या (सरसिज)

(118) – सागरवरनन्दिनि

रागः – श्रीः तालः – तिश्र एकम्

पल्लवि

सागरवर–नन्दिनि सादरमव पद्मिनि (सागर)

अनुपल्लवि

रागरस–विनोदिनि रङ्गपुर–विहारिणि (सागर)

चरणम्

रङ्ग–पुङ्गव–भामिनि रत्नमय–विभूषिणि
मङ्गलवर–दायिनि मामव वरवर्णिनि (सागर)

(119) – सामजगणसेविते

रागः – रुद्रप्रिया तालः – तिश्र एकम्

पल्लवि

सामजगण–सेविते सन्ततमव मां ललिते (सामज)

अनुपल्लवि

कामजनक–दयिते काञ्चनमय–भूषिते (सामज)

चरणम्

सारस–सम मृदुपदे सकलभुवन–मानिते
नारद–पर्वत–स्तुते नारायण–हृदि–स्थिते (सामज)

(120) – सामजगणसेविताम्

रागः – हिन्दोल तालः – तिश्र एकम्

पल्लवि

सामजगण–सेवितां सौभाग्यदां भजेऽहं (सामज)

अनुपल्लवि

हेमकलश–स्नापितां हाटकमभूषितां (सामज)

चरणम्

कामजनक–कामिनीं काङ्क्षितफल–दायिनीं
पामर–हितकारिणीं पण्डितजन–पालिनीं (सामज)

(121) - सारस सम वदने पाहि माम्

रागः – पुष्पलतिका तालः – तिश्र एकम्

पल्लवि

सारस–सम–वदने पहि मां सज्जन–नत–चरणे अम्ब (सारस)

अनुपल्लवि

वारणगण–सेविते वसुदे वन्दनमस्तु ते वरदे (सारस)

चरणम्

क्षीरपयोधिसुते क्षितिपति–संपत्–प्रदे
नीरजनाभ–दयिते निरुपमगुण–महिते (सारस)

(122) – सा वन्द्या महालक्ष्मीः

रागमालिका तालः – तिश्र एकम्

पल्लवि (रागः – खरहरप्रिया)

सा वन्द्या महालक्ष्मीः सर्वेषां सुखप्रदा (सा वन्द्या)

चरणम्

रागः – षण्मुखप्रिया

१. स्वायंभुव मन्वन्तरे सा बभूव भृगोः सुता (सा वन्द्या)

रागः – रामप्रिया

२. स्वारोचिष मन्वन्तरे सा भूतहुताशनात् (सा वन्द्या)

रागः – रिषभप्रिया

३. सोत्तमे मन्वन्तरे सलिलाद्विमलाच्छुभा (सा वन्द्या)

रागः – नाटकप्रिया

४. भूतलादुत्थिता लक्ष्मीः भूयस्तामसेऽन्तरे (सा वन्द्या)

रागः – भवप्रिया

५. रैवतेऽन्तरे मनोः रमायाः जन्म बिल्वात् (सा वन्द्या)

रागः कोकिलप्रिया

६. उद्भूता चाक्षुषेऽन्तरे उत्फुल्ल–कमलाद्रमा (सा वन्द्या)

रागः – रङ्गप्रिया

७. वैवस्वतेऽन्तरेऽस्मिन् विजया सागर–मन्थनात् (सा वन्द्या)

(123) – सिन्धुराजनन्दिनि

रागः – फलमञ्जरी तालः – रूपकम्

पल्लवि

सिन्धुराज–नन्दिनी श्रियं तनोतु सर्वदा (सिन्धुराज)

अनुपल्लवि

सिन्दूर–तिलकोज्ज्वला श्रित–सुरगण–वत्सला (सिन्धुराज)

चरणम्

मुर–हर गृह–मेधिनी मुक्तिमार्ग–दर्शिनी

सरिसजदल–लोचनी सज्जन–विश्वासिनी (सिन्धुराज)

(124) - सिन्धुसुते महालक्ष्मि

रागः – गौरीमनोहरी तालः – तिश्र एकम् (रूपकम्)

पल्लवि

सिन्धु–सुते महालक्ष्मि स्थिर–तर–सम्पत्प्रदे (सिन्धुसुते)

अनुपल्लवि

इन्दु–विनिन्दक–वदने इन्दिरे मुदं देहि (सिन्धुसुते)

चरणम्

विहगराज–वाहने विरजातट–निवसने

गृह–मध्ये विहर सदा गान–सुधा–रस–रसिके (शिन्धुसुते)

(125) – सुधार्णवसुताऽवतु

रागः – सिम्हेन्द्रमध्यमम् तालः – तिश्र एकम्

पल्लवि

सुधार्णवसुताऽवतु सुधांशु–सहजा रमा (सुधार्णव)

अनुपल्लवि

शुधाकर–निभानना सुवर्णमय–सिह्मासना (सुधार्णव)

चरणम्

धनधान्य–प्रदायिनी दारिद्य–विनाशिनी

वनजाक्ष–विनोदिनी वसुदा–वरवर्णिनी (सुधार्णव)

(126) – सुधोदधिसमुत्थिते

रागः – वसन्त तालः – रूपकम्

पल्लवि

सुधोदधि–समुत्थिते सुरपतिगुरु–समाश्रिते (सुधोदधि)

अनुपल्लवि

अधोक्षज–हृदिस्थिते अम्बुज–हस्ते नमस्ते (सुधोदधि)

चरणम्

वेदार्थ–प्रकाशिते वेगवती–तटस्थिते

नादतत्त्व–प्रकाशिते नारदादि–मुनिस्तुते (सुधोदधि)

(127) – सुमशरजननीं सदा

रागः –फलमञ्जरी तालः – मिश्र चापु

पल्लवि

सुमशरजननीं सदा स्मरामि सुरसुन्दरीं (सुमशर)

अनुपल्लवि

हिमकर–सरसीतटे हेमसिह्मासन–स्थितां (सुमशर)

चरणम्

सरसिज–निलयां रमां सारस–वदनां शुभां

दरविकसित–लोचनां धनदवैभव–प्रदां (सुमशर)

(128) – सुमसायकजननि मे

रागः बिलहरि तालः – मिश्र चापु

पल्लवि

सुमसायक–जननि मे शुभमावह सन्ततं (सुमसायक)

अनुपल्लवि

कमलासनादि–महिते काञ्चनमय–भूषिते (सुमसायक)

चरणम्

करधृत–द्वयकुवलये करुणा–वरुणालये
परमपुरुष–हृदालये पङ्केरुह–वनालये (सुमसायक)

(129) – हरिमानामोहिनीम्

रागः – कीरवाणी तालः – तिश्र एकम् (रूपकम्)

पल्लवि

हरिमानस्–मोहिनीं हरिणीं समुपाश्रये (हरिमानस)

अनुपल्लवि

परिपालित–मेदिनीं पङ्केरुह–लोचनीं (हरिमनस)

चरणम्

धरणीश्वर–पोषिणीं धनधन्य–विधायिनीं
विरजातट–वासिनीं वीणारव–मोदिनीं (हरिमानस)

(130) – हिमकरसरसीतीरपुन्नागपार्श्वे

रागः – रङ्गलीला तालः – मिश्र–त्रिपुट–तालः

पल्लवि

हिमकर–सरसीतीर–पुन्नाग–पार्श्वे हिरणवर्ण–वासा राजते रङ्गधामा (हिमकर)

अनुपल्लवि

सुमशर–जनको सूर्यकोटि–प्रकाशो सुखमनुभवति हरिः शेषपर्यङ्क–शायी (हिमकर)

चरणम्

उभयकावेरी–मध्यस्थ–मन्दिरे ओङ्काररूप–विधान–विमान–निलये
अभयमुद्रित–करोऽखिल–लोकनाथो अपवर्गान्त–सकलैश्वर्य–प्रदाता (हिमकर)

समर्पणम

(131) - श्रीलक्ष्मीकीर्तनमालिकाम्

रागः – श्रीरागः तालः – आदि

पल्लवि

श्रीलक्ष्मी–कीर्तनमालिकां श्रियै समर्पयामि भक्त्या (श्रीलक्ष्मी)

अनुपल्लवि

नीलमेघ–श्यामल–भामिन्यै नीरजासनादि पूजितायै (श्रीलक्ष्मी)

चरणम्

कावेरीतीर–विहरिण्यै काञ्चन–वर्णमय शरीरिण्यै
नावेव भवसिन्धु तारिण्यै नारायणसूनु श्रीसखोऽहं (श्रीलक्ष्मी)

******

रागानुक्रमणिका

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
1.	अमृतवर्षिणी	22	देवदेवमनःप्रिये	41
2.	अमृतवाहिनी	22	भार्गवनन्दिनि	69
3.	आनन्दभैरवी	22	अम्ब अम्बुजवननिलये	6
4.	इन्दुमती	13	अरविन्दपत्रनयनाम	10
5.	कञ्चुकधारिणी	9	कनकमयकलेवराम्	18
6.	कन्नड	29	सकलजगदधीश्वरीम्	111
7.	कमलवासिनी	16	पङ्कजदलनयने अम्ब	48
8.	कमासु	28	कलये कमलनिलयाम्	24
9.	कमासु	28	देवदेविकां वन्दे	43
10.	कल्याण वसन्त	21	उदधिशायिनःप्रियां	15
11.	कापी	22	अपारगुणमहिमां रमाम्	3
12.	किन्नरेशप्रिया	10	अखिलदेव वन्दिताम्	1
13.	कीरवाणी	21	परिपालय माम्	54
14.	कीरवाणी	21	शतपत्रसुमाराधिते	102
15.	कीरवाणी	21	हरिमानसमोहिनीम्	129
16.	खरहरप्रिया	22	भज भज मानस कमलाम्	66
17.	खरहरप्रिया	22	वन्देऽरविन्दस्थिताम्	19
18.	गानवाहिनी	16	गानवरिनिधे कमले	30
19.	गौरीमनोहरी	23	सिन्धुसुते महालक्ष्मि	124
20.	घण्टामलव	28	भक्ताभीष्टप्रदायिनीम्	64
21.	चक्रवाकम्	16	अरुणकमलसंस्थिता	12
22.	चन्द्रकौंस	21	अखिलभुवन जननि माम्	2
23.	चारुकेशी	26	अम्बुधिसम्भवाम्	7

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
24.	चारुकेशी	26	वन्दे वरदे वारिनिधिसुते	92
25.	छायागौल	15	कमला तनोतु कुशलम्	22
26.	जयमनोहरी	22	अरविन्दनिवासिनीम्	8
27.	तिलङ्	28	देवि त्रैलोक्यपालिनि	44
28.	दीपरेखा	59	कमलवनसखीं रमाम्	21
29.	देवमनोहरी	22	जलधिशयनवल्लभाम्	36
30.	देवमनोहरी	22	देव देव मनोहरि	42
31.	धर्मवती	59	अभयप्रदानशीलेऽम्ब	5
32.	धर्मवती	59	क्षीरसमुद्रमध्यनिलये	28
33.	धर्मवती	59	श्रीजगदम्बिके पाहि माम्	107
34.	नटभैरवी	20	रक्षितोऽहं महादेव्या	86
35.	नटभैरवी	20	राकेन्दुबिम्बवदनामु	89
36.	नागस्वरावली	29	विहर मे हृदये सदा	99
37.	नायकि	22	मतिं देहि मे मङ्गलनायिके	75
38.	नारायणगौळ	28	आर्तत्राणपरायणायै	13
39.	नारायणी	28	कमलनाभवल्लभाम्	20
40.	नारायणी	28	पाहि मां जगदीश्वर दयिते	57
41.	नीळा	28	परदेवतया पद्मालयया	53
42.	पन्थुवरालि	51	वासवाद्यमरवन्दिते	97
43.	परूजु	15	पाहि मां पद्मनयने	58
44.	पुष्पलतिका	22	क्षेमं कुरु सन्ततम्	29
45.	पुष्पलतिका	22	सारस सम वदने पाहि माम्	121
46.	पूर्विकल्याणी	53	भव मम शरणं भार्गवनन्दिनि	68
47.	पूषावलि	64	शशिवदने सततं मम सदने	105

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
48.	प्रसादिनी	8	नागशयनसहचरीं नमामि	46
49.	प्रियङ्करी	26	सर्वलोकप्रियङ्कर्यै	115
50.	फलमञ्जरी	22	सिन्धुराजनन्दिनि	123
51.	फलमञ्जरी	22	सुमशरजननीं सदा	127
52.	बहुधारी	28	पङ्केरुहासनायाम्	51
53.	बिलहरि	29	राजीवनेत्रयुगले मामव	90
54.	बिलहरि	29	सुमसायकजननि मे	128
55.	बेगड	29	पङ्कजनाभकुटुम्बिनि	49
56.	बेगड	29	वनजासनां भजेऽहम्	93
57.	बौलि	15	कञ्जनाभभामिनीम्	17
58.	भार्गवनन्दिनी	57	परिरक्षतु मां भार्गवनन्दिनी	56
59.	भूपालम्	8	सदाऽऽश्रयामि जननीम्	114
60.	भैरवी	20	अरविन्दनिवासिन्यै	9
61.	मङ्गलकैशिकी	15	तारय मां त्रिभुवनपालिनि	39
62.	मध्यमावती	22	मङ्गलदेवतामुपास्महे	71
63.	मलहरी	15	जलजासनां भजेऽहं	35
64.	मलहरी	15	मातर्नमामि कमले	79
65.	मुखारि	22	कलये कमलनिलयाम्	23
66.	मोहनम्	65	भज मानस जननीम्	67
67.	मोहनम्	65	वारणगणसेविताम्	95
68.	यदुकुलकाम्भोजी	28	मानातीत-प्रथितविभवाम्	81
69.	रङ्गलीला	22	हिमकरसरसीतीरपुन्नागपार्श्वे	130
70.	रविचन्द्रिका	28	त्रिलोकजननीं चिन्तयाम्यहम्	40

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
71.	रागेश्वरी	28	कुवलयदलनयने सततम्	27
72.	रागेश्री	28	सरसिजवननिलया	117
73.	रिषभप्रिया	61	जननीं जलनिधिसम्भवाम्	33
74.	रुद्रप्रिया	22	सामजगणसेविते	119
75.	ललिता	15	इन्द्रादिदेववन्द्याम्	14
76.	ललिता	15	रक्षितोऽहं महादेव्या	85
77.	ललिता	15	शीतकिरणसहजाम्	106
78.	वकुलाभरणम्	14	मणिमयमकुटविराजिताम्	73
79.	वरमु	22	काञ्चनमयकलेवराम्	26
80.	वरमु	22	जननि भव शरणम्	32
81.	वरमु	22	पङ्कजासनस्थिते	50
82.	वरवर्णिनी	16	नमामि वरवर्णिनीम्	45
83.	वरालिः	39	भक्ताभीष्टप्रदायिनीम्	63
84.	वलजी	16	शङ्खचक्रधरां देवीम्	100
85.	वसन्त	17	मनसा स्मरामि मङ्गलनिलयाम्	76
86.	वसन्त	17	सुधोदधिसमुत्थिते	126
87.	विजयनागरी	58	जगदीश्वर नयिकाम्	31
88.	वीणारवः	26	प्रीणाति विश्वजननी	62
89.	शुद्धबङ्गाल	22	मातः श्री महालक्ष्मि	80
90.	शुद्धधन्याशि	20	कलशाम्बुधिकन्यकाम्	25
91.	शुद्धसावेरी	28	कञ्जदलविलोचनीम्	16
92.	शुद्धसावेरी	28	मङ्गलदेवतां वन्दे	71
93.	श्रीरागः	22	सागरवरनन्दिनि	118
94.	श्रीरागः	22	भावयेऽहं रङ्गधामगेहिनीम्	70

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
95.	श्रीरागः	22	श्वेतकूटनिवसने	110
96.	श्रीरागः	22	श्रीलक्ष्मीकीर्तनमालिकाम्	131
97.	षण्मुखप्रिया	56	निरवधिकरुणास्वरूपिणि	47
98.	सरस्वती	58	अप्रमेयामहं वन्दे	4
99.	सरस्वती	58	पाहि मां सदा पद्मवनालये	59
100.	सरसाङ्गी	27	पाहि मां परमेश्वरि	60
101.	सरसाङ्गी	27	पुरुषोत्तमयुवति त्वाम्	61
102.	सरसाङ्गी	27	मनसा स्मरामि मातरम्	77
103.	सरसीरुह	27	शरदिन्दुनिभानने	104
104.	सामा	29	मुदमावह मे भगवति	83
105.	सामा	29	शर्वरीशवदनां भज	103
106.	सारङ्गः	65	पद्ममालाधरां देवीम्	52
107.	सारङ्गः	65	मरकतमणिवलये	78
108.	सालगभैरवी	22	अरविन्दलोचनाम्	11
109.	सालगभैरवी	22	भजत भार्गवनन्दिनीम्	65
110.	सिम्हेन्द्रमध्यमम्	57	सुधार्णवसुताऽवतु	125
111.	सुधामयी	27	जय जय जगदम्बिके	37
112.	सुप्रदीप	17	वारिजदलनयनां भजेऽहम्	96
113.	सुरटी	28	रक्ताम्बुजनिवासिनीम्	84
114.	सुरटी	28	सर्वोपद्रव निवारिणीम्	116
115.	सौराष्ट्रम्	17	रक्षितोऽहं महालक्ष्म्या	87
116.	हमीरुकल्याणी	65	वाहिनीशतनये पाहि माम्	98
117.	हरिकाम्भोजी	28	वरदाभय कराम्बुजां कमलाम्	94

क्रम-संख्या	रागः	मेलः	कीर्तनं	कीर्तन संख्या
118.	हरिकाम्भोजी	28	श्रीरङ्गराजमहिषीम्	109
119.	हस्तिनादः	59	तप्तचामीकराभां माम्	38
120.	हाटकभूषणी	28	परिपालयाशु माम्	55
121.	हिन्दोल	20	जलजनाभसहचरीम्	34
122.	हिन्दोल	20	मामव मङ्गलालये	82
123.	हिन्दोल	20	शतपत्रसमानने	101
124.	हिन्दोल	20	सामजगणसेविताम्	120
125.	हेमन्त	28	मणिसरोरुहे स्थिताम्	74
126.	हेमवती	58	कनकसन्निभकान्तिमतीम्	19
127.	हेमवती	58	सत्यलोकादवतीर्णां माम्	112
128.	हंसनादः	60	सततं स्मरामि	113
129.	हंसानन्दी	53	रङ्गपुरीनिवासिनीम्	88
130.	रागमालिका	--	श्रीरङ्गनायिका अवतु	108
131.	रागमालिका	--	सा वन्द्या महालक्ष्मीः	122

****